शङ्खातपत्रशिविकागजपद्मोपमा नृपे ।
कुम्भाङ्कुशपताकाभा मृणालाभा निरीश्वरे ।
दामाभाश्च गवाढ्यानां स्वस्तिकाभा नृपेश्वरे ।
चक्रासितोमरधनुःकुन्ताभा नृपतेः करे ॥
उदूखलाभा यज्वाढ्या वेदीभाश्चाग्निहोत्रिणि ।
वापीदेवकुलाभाश्च त्रिकोणाभाश्च धार्म्मिके ॥
अङ्गुष्ठमूलगा रेखाः पुत्राः स्युश्च दारिकाः ।
प्रदेशिनीगता रेखा कनिष्ठामूलगामिनी ॥
शतायुषश्च कुरुते छिन्नया तरुतो भयम् ।
निःस्वाश्च बहुरेखाः स्युर्निर्द्धयाश्चिबुकैः कृशैः ॥”
इति गारुडे ६६ अध्यायः ॥

रेखागणितः, पुं, ( रेखाया गणितं प्रमाणस्वरूपादि यत्र । ) श्रीजयसिंहमहाराजपण्डितद्विजसम्राड्जगन्नाथकृतगणितग्रन्थविशेषः । तस्य संक्षिप्तविवरणम् । यथा,—
“येनेष्टं वाजपेयाद्यैर्म्महादानानि षोडश ।
दत्तानि द्विजवर्य्येभ्यो गोग्रामगजवाजिनः ॥
तस्य श्रीजयसिंहस्य तुष्ट्यै रचयति स्फुटम् ।
द्विजः सम्राड् जगन्नाथो रेखागणितमुत्तमम् ॥
अपूर्व्वं विहितं शास्त्रं यत्र कोणावबोधनात् ।
क्षेत्रेषु जायते सम्यक् व्युत्पत्तिर्गणिते तथा ॥
शिल्पशास्त्रमिदं प्रोक्तं ब्रह्मणा विश्वकर्म्मणे ।
पारम्पर्य्यवशादेतदागतं धरणीतले ॥
तदुच्छिन्नं महाराजजयसिंहाज्ञया पुनः ।
प्रकाशितं मया सम्यक् गणकानन्दहेतवे ॥”*॥
अथ रेखागणिता । अत्र ग्रन्थे पञ्चदशाध्यायाः सन्ति । अष्टसप्तोत्तरचतुःशतम् क्षेत्राणि सन्ति । तत्र प्रथमाध्याये अष्टचत्वारिंशत्क्षेत्राणि । तत्रादौ परिभाषा । यः पदार्थः दर्शनयोग्यः विभागानर्हः स बिन्दुर्वाच्यः । यः पदार्थः दीर्घः विस्ताररहितः विभागार्हः स रेखाशब्दवाच्यः । विस्तारदैर्घ्ययोर्यद्विद्यते तद्धरातलं तदेव क्षेत्रम् । तद्द्विविधं एकं जलवत् समं द्वितीयं विषमम् । अथ रेखापि द्विविधा । एका वक्रा अन्या सरला । अथ सरलरेखालक्षणम् । यस्यां न्यस्ता बिन्दवः अवलोकिताः सन्त एकबिन्दुनाच्छाद्यन्ते सा सरला अन्यथा कुटिला । धरातलमपि समं विषमञ्च ज्ञेयम् । समं यथादर्शोऽपि । यत् रेखाद्वयं समं समानान्तरं न भवति तस्य यस्मिन् प्रदेशे बह्वन्तरं भवति तद्दिशि वर्द्धितयो रेखयोरन्तरमुत्तरोत्तरं अधिकमेव भवति यत्राल्पमन्तरं भवति तद्दिशि वर्द्धितयो रेखयोरन्तरमुत्तरोत्तरमल्पमेव भवति यावद्रेखासंयोगं तदनन्तरमन्तरं वर्द्धिष्णु भवति । यत्र कोणशब्दः तत्र सरलरेखाकृत एव कोणो ज्ञेयः । यत्र रेखाशब्दः तत्र सरलैव रेखा ज्ञेया । यत्र भूमितलशब्दः तत्र जलसमीकृतमेव भूतलं ज्ञेयम् । इति रेखागणितस्य परिभाषा ॥

रेखाभूमिः, स्त्री, ( रेखास्थिता भूमिः । ) लङ्कासुमेरुपर्व्वतयोर्म्मध्यस्थ्रगतदेशः । यथा,—
“यल्लङ्कोज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः ।
आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात्
स्यात्तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम् ॥”
इति सिद्धान्तशिरोमणिः ॥ * ॥
अन्यच्च । रेखोक्ता सूर्य्यसिद्धान्ते । यथा रेखामधिकृत्य ।
“राक्षसालयदेवौकःशैलयोर्म्मध्यसूत्रगाः ।
रौहितकमवन्ती च तथा सन्निहितं सरः ॥”
अस्यार्थः । लङ्कासुमेरुपर्व्वतयोर्म्मध्यसूत्रगा देशा रेखासंज्ञिताः । तान् देशानाह । रोहितकदेशोऽवन्तीदेशः सन्निहितं सरः कुरुक्षेत्रञ्च । रेखायाः पूर्व्वदेशे परदेशे च यथासंख्यं सूर्य्योदयकालात् परकालं पूर्व्वकालञ्च वारप्रवृत्तिः स्यादित्यर्थः । एतेनैतदुक्तं भवति रेखासंज्ञकदेशस्थलोका यदा सूर्य्यं पश्यन्ति तदैव सर्व्वदेशे वारप्रवृत्तिरित्यर्थः । तत्र रेखापूर्व्वस्थाः सन्निहितत्वादादौ सूर्य्यं पश्यन्ति तदनन्तरञ्च रेखास्थाः । अतो रेखापूर्व्वे सूर्य्योदयात् परं वारः । तथा रेखास्थैः सूर्य्ये दृष्टे सति पश्चात् रेखापरस्थाः पश्यन्ति अतो रेखापरदेशे सूर्य्योदयात् पूर्व्वं वार इत्यर्थः । तत्र कालपरिमाणमाह । रेखातो यावन्ति देशान्तरयोजनानि तत्सम्मिताभिर्व्विघटीभिः पलैः पादहीनाभिः चतुर्थभागहीनाभिर्व्वारप्रवृत्तिः स्यादित्यर्थः । देशान्तरसाधनप्रकारस्तु सूर्य्यसिद्धान्ते उक्तः । अत्र तु संक्षेपेण किञ्चित् कथ्यते । गौडे पञ्चदशाधिकशतयोजनानि ११५ । दक्षिणराढे गङ्गातीरे दशाधिकशतम् ११० । भैरवीतीरे विंशत्यधिकशतम् १२० । वङ्गे सुवर्णग्रामादौ चत्वारिंशदधिकशतम् १४० । वाराणस्यामष्टोत्तरशतम् १०८ देशान्तरम् । एवमन्यत्राप्यूह्यम् । तन्मतन्तु लोकसंगृहीतमिति किन्तु सूर्य्यसिद्धान्ते अर्द्धरात्रावेव वारप्रवृत्तिरुक्ता । यथा,—
“वारप्रवृत्तिः प्राग्देशे क्षपार्द्धेऽभ्यधिके भवेत् ।
तद्देशान्तरनाडीभिः पश्चादूने विनिर्द्दिशेत् ॥”
इति दीपिकाटीकायामर्थकौमुद्यां गोविन्दानन्दः ॥

रेचकं, क्ली, (रेचयतीति । रिच् + णिच् + ण्वुल् ।) कङ्कुष्ठदन्तिका । इति राजनिर्घण्टः ॥ ( भेदके, त्रि ॥ )

रेचकः, पुं, ( रेचयतीति । रिच् + णिच् + ण्वुल् ।) यवक्षारः । इति त्रिकाण्डशेषः ॥ जयपालवृक्षः । इति राजनिर्घण्टः ॥ क्रीडार्थजलनिःक्षेपयन्त्रम् । पिच्कारी इति भाषा । यथा,
“सिच्यमानोऽच्युतस्ताभिर्म्महिषीभिः स रेचकैः ।
प्रतिषिञ्चन् विचिक्रीडे यक्षीभिर्यक्षराडिव ॥”
इति श्रीभागवते । १० । ९० । ९ ॥
( श्वासनासिकया प्राणायामाङ्गमुच्यमानवायुः । यथा, भागवते । ३ । २८ । ९ ।
“प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।”
अस्यान्यद्विवरणं प्राणायामशब्दे द्रष्टव्यम् ॥ )

रेच्यः, पुं, श्वासनासिकया प्राणायामाङ्गमुच्यमानवायुः । यथा,—
“पूरकः कुम्भको रेच्यः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्ट उच्छ्वासो ध्मातुः पूरक उच्यते ।
कुम्भको निश्चलश्वासो मुच्यमानस्तु रेचकः ॥”
इत्याह्निकाचारतत्त्वम् ॥
भेदके, त्रि ॥

रेचनं, ( रिच् + ल्युट् । ) मलभेदनम् । तत्पर्य्यायः । प्रस्कन्दनम् २ विरेकः ३ विरेचनम् ४ । इति रत्नमाला ॥ रेकः ५ रेचना ६ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ३ ।
“रसज्ञानं वमनार्थमध्यायो रेचनाय च ॥”
रेचनद्रव्याणि तु सुश्रुते । १ । ४४ । अध्यायतो ज्ञेयानि ॥ )

रेचनकः, पुं, ( रेचयतीति । रिच् + णिच् + ल्युः । ततः स्वार्थे कन् । ) कम्पिल्लकः । इति राजनिर्घण्टः ॥

रेचना, स्त्री, ( रिच् + णिच् + युच् । टाप् । ) काम्पिल्लः । इति शब्दरत्नावली ॥

रेचनी, स्त्री, ( रिच्यतेऽनयेति । रिच् + ल्युट् + ङीप् ) काम्पिल्लः । इति शब्दरत्नावली ॥ कालाञ्जनी । दन्तीवृक्षः । इति राजनिर्घण्टः ॥ श्वेतत्रिवृता । इति मेदिनी ॥ ( अस्याः पर्य्यायो यथा,—
“श्वेता त्रिवृत्ता भङ्गी स्यात् त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोथा रेचनीति च ॥”
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ॥
वटपत्री । तत्पर्य्यायो यथा,—
“वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

रेची, स्त्री, ( रेचयतीति । रिच् + णिच् + अच् । गौरादित्वात् ङीष् । ) कम्पिल्लकः । अङ्कोठः । इति राजनिर्घण्टः ॥

रेज, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । ) ऋ, अरिरेजत् । ङ, रेजते रिरेजे । इति दुर्गादासः ॥

रेट, ऋ ञ याचे । वाचि । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-द्विक०-सेट् । ) ऋ, अरिरेटत् । ञ, रेटति रेटते । याच्ञा याचनम् । इति दुर्गादासः ॥

रेणुः, पुं स्त्री, ( रिणातीति । री गतिरेषणयोः + “अजिवृरीभ्यो निच्च ।” उणा० ३ । ३८ । इति णुः । ) धूलिः । इत्यमरः ॥ ( यथाह कश्चित् ।
“मानुषीकरणरेणुरस्ति ते
पादयोरिति कथा प्रथीयसी ।